श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे

# ॥ अष्टात्रिंशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ अष्टात्रिंशः सर्गः ॥

## श्रीरामशक्तिविषयकमनुभवं प्रतिपाद्य मारीचेन रावणस्य श्रीरामापराधकरणान्निवारणम्

कदाचिदप्यहं वीर्यात् पर्यटन् पृथिवीमिमाम्।
बलं नागसहस्रस्य धारयन् पर्वतोपमः ॥ **3.38.1** ॥

नीलजीमूतसङ्काशस्तप्तकाञ्चनकुण्डलः।
भयं लोकस्य जनयन् किरीटी परिघायुधः ॥ **3.38.2** ॥

व्यचरन् दण्डकारण्यमृषिमांसानि भक्षयन्।
विश्वामित्रोऽथ धर्मात्मा मद्वित्रस्तो महामुनिः ॥ **3.38.3** ॥

स्वयं गत्वा दशरथं नरेन्द्रमिदमब्रवीत्।
अयं रक्षतु मां रामः पर्वकाले समाहितः ॥ **3.38.4** ॥

मारीचान्मे भयं घोरं समुत्पन्नं नरेश्वर।
इत्येवमुक्तो धर्मात्मा राजा दशरथस्तदा ॥ **3.38.5** ॥

प्रत्युवाच महाभागं विश्वामित्रं महामुनिम्।
ऊनद्वादशवर्षोऽयमकृतास्त्रश्च राघवः ॥ **3.38.6** ॥

कामं तु मम तत् सैन्यं मया सह गमिष्यति।
बलेन चतुरङ्गेण स्वयमेत्य निशाचरम् ॥ **3.38.7** ॥

वधिष्यामि मुनिश्रेष्ठ शत्रुं तव यथेप्सितम्।
एवमुक्तः स तु मुनी राजानमिदमब्रवीत्॥ **3.38.8** ॥

रामान्नान्यद् बलं लोके पर्याप्तं तस्य रक्षसः।
देवतानामपि भवान् समरेष्वभिपालकः॥ **3.38.9** ॥

आसीत् तव कृतं कर्म त्रिलोकविदितं नृप।
काममस्ति महत् सैन्यं तिष्ठत्विह परन्तप॥ **3.38.10** ॥

बालोऽप्येष महातेजाः समर्थस्तस्य निग्रहे।
गमिष्ये राममादाय स्वस्ति तेऽस्तु परन्तप॥ **3.38.11** ॥

इत्येवमुक्त्वा स मुनिस्तमादाय नृपात्मजम्।
जगाम परमप्रीतो विश्वामित्रः स्वमाश्रमम्॥ **3.38.12** ॥

तं तथा दण्डकारण्ये यज्ञमुद्दिश्य दीक्षितम्।
बभूवोपस्थितो रामश्चित्रं विस्फारयन् धनुः॥ **3.38.13** ॥

अजातव्यञ्जनः श्रीमान् बालः श्यामः शुभेक्षणः।
एकवस्त्रधरो धन्वी शिखी कनकमालया॥ **3.38.14** ॥

शोभयन् दण्डकारण्यं दीप्तेन स्वेन तेजसा।
अदृश्यत तदा रामो बालचन्द्र इवोदितः॥ **3.38.15** ॥

ततोऽहं मेघसङ्काशस्तप्तकाञ्चनकुण्डलः।
बली दत्तवरो दर्पादाजगामाश्रमान्तरम्॥ **3.38.16** ॥

तेन दृष्टः प्रविष्टोऽहं सहसैवोद्यतायुधः।
मां तु दृष्ट्वा धनुः सज्यमसम्भ्रान्तश्चकार ह॥ **3.38.17** ॥

अवजानन्नहं मोहाद् बालोऽयमिति राघवम्।
विश्वामित्रस्य तां वेदिमभ्यधावं कृतत्वरः॥ **3.38.18** ॥

तेन मुक्तस्ततो बाणः शितः शत्रुनिबर्हणः।
तेनाहं ताडितः क्षिप्तः समुद्रे शतयोजने॥ **3.38.19** ॥

नेच्छता तात मां हन्तुं तदा वीरेण रक्षितः।
रामस्य शरवेगेन निरस्तो भ्रान्तचेतनः॥ **3.38.20** ॥

पातितोऽहं तदा तेन गम्भीरे सागराम्भसि।
प्राप्य संज्ञां चिरात् तात लङ्कां प्रति गतः पुरीम्॥ **3.38.21** ॥

एवमस्मि तदा मुक्तः सहायास्ते निपातिताः।
अकृतास्त्रेण रामेण बालेनाक्लिष्टकर्मणा॥ **3.38.22** ॥

तन्मया वार्यमाणस्तु यदि रामेण विग्रहम्।
करिष्यस्यापदं घोरां क्षिप्रं प्राप्य न शिष्यसि॥ **3.38.23** ॥

क्रीडारतिविधिज्ञानां समाजोत्सवदर्शिनाम्।
रक्षसां चैव सन्तापमनर्थं चाहरिष्यसि॥ **3.38.24** ॥

हर्म्यप्रासादसम्बाधां नानारत्नविभूषिताम्।
द्रक्ष्यसि त्वं पुरीं लङ्कां विनष्टां मैथिलीकृते॥ **3.38.25** ॥

अकुर्वन्तोऽपि पापानि शुचयः पापसंश्रयात्।
परपापैर्विनश्यन्ति मत्स्या नागह्रदे यथा॥ **3.38.26** ॥

दिव्यचन्दनदिग्धाङ्गान् दिव्याभरणभूषितान्।
द्रक्ष्यस्यभिहतान् भूमौ तव दोषात् तु राक्षसान्॥ **3.38.27** ॥

हृतदारान् सदारांश्च दश विद्रवतो दिशः।
हतशेषानशरणान् द्रक्ष्यसि त्वं निशाचरान्॥ **3.38.28** ॥

शरजालपरिक्षिप्तामग्निज्वालासमावृताम्।
प्रदग्धभवनां लङ्कां द्रक्ष्यसि त्वमसंशयम्॥ **3.38.29** ॥

परदाराभिमर्शात् तु नान्यत् पापतरं महत्।
प्रमदानां सहस्राणि तव राजन् परिग्रहे ॥ **3.38.30** ॥

भव स्वदारनिरतः स्वकुलं रक्ष राक्षसान्।
मानं वृद्धिं च राज्यं च जीवितं चेष्टमात्मनः ॥ **3.38.31** ॥

कलत्राणि च सौम्यानि मित्रवर्गं तथैव च।
यदीच्छसि चिरं भोक्तुं मा कृथा रामविप्रियम् ॥ **3.38.32** ॥

निवार्यमाणः सुहृदा मया भृशं
प्रसह्य सीतां यदि धर्षयिष्यसि।
गमिष्यसि क्षीणबलः सबान्धवो
यमक्षयं रामशरास्तजीवितः ॥ **3.38.33** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे अष्टात्रिंशः सर्गः ॥